# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा –** आचार्य**-1** | **सत्रम् – 1** | **गुणाः - 70** |
| **विषयः –** धर्मशास्त्रम् | **प्रश्नपत्रम् - 4 - CC - 4.1.3** | **समयः- 8 तः 11** |
| **दिनाङ्कः- 12/10/2019** | **सन्दर्भग्रन्थः –** धर्मसिन्धुः (परिच्छेद-2) | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 एकस्य ससन्दर्भं व्याख्या कार्या । 05**

1. संक्रान्तौ यानि दत्तानि हव्यकव्यानि दातृभिः ।
   तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि ।।
2. धेनुं तिलमयीं राजन्दद्याच्चैवोत्तरायणे ।
   तिल तैलेन दीपाश्च देयाः शिवगृहे शुभाः ।।

**प्र-2 एकस्य निबन्धात्मकमुत्तरं लिखत । 10**

1. चम्पाषष्ठी एवं स्कन्धषष्ठी महत्वं यथाग्रन्थं वर्णयत ।
2. अन्वष्टका श्राद्धमहत्वं प्रतिपाद्य तत् कर्तव्यक्रमं वर्णयत ।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 एकस्य सविस्तरेण व्याख्या कार्या । 05**

1. तप्तेन वारिणा स्नानं यद्गृहे क्रियते नरैः ।
   षडब्दफलदं तद्धि मकरस्थे दिवाकरे ।।
2. दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च ।
   प्रातः स्नानं करोम्यद्य माघे पापविनाशनम् ।।

**प्र-4 एकस्य सविस्तरमुत्तरं लिखत । 10**

3. माघस्नानारम्भः तद् अधिकारी विधिः तथा च स्नानफलं यथाग्रन्थं वर्णयत ।
1. माघमासे कुम्भसंक्रान्तिः पुण्यकालः प्रयागादिषु स्नानमहत्वं प्रतिपादयत ।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 एकस्य व्याख्यानात्मकमुत्तरं लिखत । 05**

1. यामत्रयादर्वाक् चतुर्दशी समाप्तौ चतुर्दश्यन्ते पारणम् । यामत्रयोर्ध्वगामिन्यां चतुर्दश्यां प्रातश्चतुर्दशीमध्ये एव पारणमिति माधवादयः । निर्णयसिन्धौ तु यामत्रयादर्वाक् चतुर्दशीसमाप्तावपि चतुर्दशीमध्ये एव पारणं ननु कदाचिदपि चतुर्दश्यन्त ।

2. यज्ञोपवीतान्ते गोरोचनकस्तूरीकुंकुमकर्पूरागरुचन्दनमिश्रितानुलेपेन लिङ्गलेपयेत् । पञ्चविंशतिमलमितः सर्वोनुपेल इति अनुलेप परिणामं यथाशक्ति वा । धत्तूरकरवीरकुसुमैर्बिल्वपत्रैश्च पूजनमिति प्रशस्तम् ।

**प्र-6 एकस्य विस्तरेण उत्तरं लिखत ।** **10**

1. होलिकानिर्णयः दहनकालः वर्ज्यकालश्च यथाग्रन्थं लिखत ।
2. शनिव्रतं दशनामानि स्तोत्रसारं च यथाग्रन्थं वर्णयत ।

**प्र-7 एकस्य व्याख्यानात्मकमुत्तरं लिखत ।** **05**

1. उपोषणं चतुर्दश्यां चतुर्दश्यां च पारणम् कृतैः सुकृतलक्षैस्तु लभ्यते यदि वा न वा ।
2. चतुर्दश्यां निराहारो भूत्वा शंभो परेऽहनि भोक्ष्येऽहं भुक्तिमुक्त्यर्थं शरणं मे कवेश्वर ।

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-8 एकस्य सविस्तरमुत्तरं लिखत ।** **10**

1. शिवरात्रिव्रतप्रयोगः य़थाग्रन्थं चर्चयत ।
2. पार्थिवलिङ्गपूजाविधिः तत् महत्वञ्च यथाग्रन्थं वर्णयत ।

**(पञ्चमान्वितिः - युनिट- 5 )**

**प्र-9 दशानां लघूत्तराणि लिखत ।** **10**

1. धर्मसिन्धुग्रन्थकर्ता कः अस्ति
2. धनुः संक्रान्तौ कति नाड्यः पुण्यकालिका उच्यते
3. नागपूजा पञ्चमी दाक्षिणात्यानां सा कदा भवति
4. चम्पाषष्ठी कदा आगच्छति
5. दत्तात्रेय जयन्ति कदा भवति
6. दिवामकरसंक्रान्तौ कतिनाड्यः पुण्याः
7. प्रयागस्मरणं कदा कार्यम्
8. मूलकं कदा न भक्ष्याः
9. वसन्तपञ्चमी कस्मिन् मासे भवति
10. भीष्माष्टमी कस्मिन् मासे आगच्छति
11. वसूनां अवतारः शान्तनोदात्मजः कः
12. शिवरात्रिः कीदृशी ग्राह्या
13. शिवशब्दस्य कोऽर्थः
14. द्वापरे कलौ च कीदृशं लिङ्गं श्रेष्ठम्
15. कीदृशं शिवलिङ्गं रोगनाशकरं उच्यते

******************